श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकूरनाथश्रीवत्सचिह्नमिश्र विरचितं

# ॥ श्री यतिराज प्रार्थनापञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यतिराज प्रार्थनापञ्चकम् ॥

यतीश्वर ! शृणु श्रीमन् ! कृपया परया तव।
मम विज्ञापनमिदं विलोक्य वरदं गुरुम् ॥ 1 ॥

अनादिपापरचिताम् अन्तःकरणनिष्ठिताम्।
यतीन्द्रविषये सान्द्रां विनिर्वासय वासनाम् ॥ 2 ॥

अपि प्रार्थयमानानां पुत्रक्षेत्रादिसम्पदाम्।
कुरु वैराग्यमेवात्र हितकारिन् यतीन्द्र ! नः ॥ 3 ॥

यथाऽपराधा न स्युर्मे भक्तेषु भगवत्यपि।
तथा लक्ष्मणयोगीन्द्र ! यावद्देहं प्रवर्तय ॥ 4 ॥

आमोक्षं लक्ष्मणार्य ! त्वत्प्रबन्धपरिशीलनैः।
कालक्षेपोऽस्तु नस्सद्भिः सहवासमुपेयुषाम् ॥ 5 ॥

पराङ्कुशमुनीन्द्रादिपरमाचार्यसूक्तयः।
स्वदन्तां मम जिह्वायै स्वत एव यतीश्वर ! ॥ 6 ॥

इत्येतत् सादरं विद्वान् प्रार्थनापञ्चकं पठन्।
प्राप्नुयात् परमां भक्तिं यतिराजपदाब्जयोः ॥ 7 ॥

काषायशोभिकमनीयशिखानिवेशं
    दण्डत्रयोज्वलकरं विमलोपवीतम्।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं
    रूपं तवास्तु यतिराज ! दृशो ममाग्रे ॥ 8 ॥

न चेद्रामानुजेत्येषा चतुरा चतुरक्षरी।
कामवस्थां प्रपद्यन्ते जन्तवो हन्त मादृशाः॥ 9॥

पुण्याम्भोजविकासाय पापध्वान्तक्षयाय च।
श्रीमानाविरभूद्भूमौ रामानुजदिवाकरः॥ 10॥

तृणीकृतविरिञ्चादिनिरङ्कुशविभूतयः।
रामानुजपदाम्भोजसमाश्रयणशालिनः॥ 11॥

॥ श्री यतिराज प्रार्थनापञ्चकं समाप्तम्॥